Title of Mss.: Sulapani Maha
Language : Mohopadhya
No. of Folios : San
Materials : T.P.
Conservation : Preventive/Curative
Performed by KKHL , MCC: GU
National Mission for manuscripts,
New Delhi,
Date :

(4)

শ্রী শূলপাণি মহামহোপাধ্যায় —

— বিরচিত

॥ দুর্গোৎসববিবেকঃ ॥

Folios — (11) (complete)

ওঁ নমো গণেশায় ॥ নত্বা শৈলীপদাম্ভোজং ক্রমদ্ভূষণশোভিতং । দুর্গোৎসববিবেকস্তু ক্রিয়তে শূলপাণিনা ॥ নিন্দাশ্রবণাদ্ দুর্গাপূজা নিত্যা । যথা যো মোহাদথবালস্যাদ্দেবীং দুর্গাং মহোৎসবে । ন পূজয়তি দম্ভাদ্বা
দ্বেষাদ্বাপ্যথ ভৈরব । ক্রুদ্ধা ভগবতী তস্য কামানিষ্টান্নিহন্তি বৈ । ইতি কালিকাপুরাণাৎ । বিধিমন্তি যাবিহিতফলশ্রুতেঃ কাম্যা চ । কৃত্বৈবং পরমামাপুর্নির্বৃতিং ত্রিদিবৌকসঃ । এবমন্যৈরপি মহাদেব্যাঃ কার্য্যং প্রপূজ-
নমিতি কালিকাপুরাণাৎ । ভবিষ্যোত্তরেপি । ভবানীতুষ্টয়ে পার্থ সম্যক্ সমসূয়াযত । তত্রৈবাপি শাতনানাং নাশার্থং তৈঃ মহায়াত । দেবীপুরাণং । তুষ্টায়াং নৃপদুর্গায়াং নিমেষার্দ্ধেন যৎফলং । ন তৎক্রতু-
মহেযোপি শতাব্দবর্ষশতৈরপি । ভবিষ্যে ন তত্র দেশে হত্ত্রিস্রিং নরৈঃ খং প্রজায়তে । নাকালে ম্রিয়তে কশ্চিৎ পূজ্যতে যত্র চণ্ডিকা । অনেন বিধিনা যস্তু দেবীং প্রীণয়তে নরঃ । স্কন্দবৎ পালয়েত্তং তু দেবী সর্ব্বা-
পদি স্থিতং । পুত্রদারধনর্দ্ধীনাং সংখ্যা তস্য ন বিদ্যতে । ভক্তিহীনবস্মানতোপানপ্রেনদ্বেশাগনোত্তরে । তত্তৎকাম্যপূজনে চ প্রসঙ্গান্নিত্যপূজা সিদ্ধিঃ । তথা কাম্যহোমাদাবপি বোধ্যং প্রসঙ্গলক্ষণত্ব-
প্রায়শ্চিত্তবিবেকেঽনুসন্ধেয়ং ॥ দেবীপূজায়াং সর্ব্বাধিকারমাহ ভবিষ্যোত্তরে । ব্রাহ্মণৈঃ ক্ষত্রিয়ৈর্বৈশ্যৈঃ শূদ্রৈরন্যৈশ্চ সেবকৈঃ । এবং নানাম্লেচ্ছগণৈঃ পূজ্যতে সর্ব্বদস্যুভিঃ । দেবীপুরাণং । মুখ্যমুখ্য-
ন্যভাবাপি পূজয়েৎ পূজয়েত্তবা । পূজয়েত্তথা মনেপদাদ্যে তু নিজত্তা তত্তমূর্ত্তিং কবনামাসমর্থো যদ্বাবা পূজা কার্য্যা । সা পূজা তত্তৎকল্পোক্তনানাদিনসাধ্যাপ্যেকৈব প্রতীয়তে । শারদীয়া মহাপূজা চতুঃক-
র্ম্মময়ী স্মৃতা । তং তিথিত্রয়মাসাদ্য কুর্য্যাত্তস্যা বিধানতঃ । জেষ্ঠাদিলিঙ্গপুরাণাদিষু একবচননির্দ্দেশাৎ ফলজনকাপূর্ব্বৈকত্বাচ্চ । চতুঃকর্ম্মময়ী স্নপনপূজনবলিদানহোমরূপা ॥ শারদীয়ে স্নপনলক্ষণং

শ্রী ২

। বসন্তকালীনায়াঃ পূজায়ামপি স্নপন পূজন বলিদান হোমরূপ চতুষ্কং ব্যবহারনেতৈ সপ্তমী মারভ্য তিথিত্রয়সাধ্যাত্বেনৈব । শারদীয়মহাপূজাসু পঞ্চমাস্তিকনঃ । শক্রধ্বজাং পঞ্চায়ুক্তেন সার্দ্ধমুল্লেখ্যযুক্তামিত্যস্যত্ত মীয়া । শ্রাবক্ষস্য ংশমীঞ্চ যাবৎ প্রাপ্ত ত্রয়ঃ পর্ব্বত্রবাজপূর্ব্বং । সাত্ত্বিকাদিভেদেন সাত্রিবিধা যথাস্কান্দে ॥ শারদীচণ্ডিকা পূজা ত্রিবিধা পরিগীয়তে । সাত্ত্বিকী রাজসী চৈব তামসী চেতি তাং শৃণু । সাত্ত্বিকী জপযজ্ঞাদ্যৈর্নৈবে দ্যৈশ্চ নিরামিষৈঃ । মাহাত্ম্যং ভগবত্যাশ্চ পুরাণাদিষু কীর্ত্তিতং । পাঠস্তস্য জপঃ প্রোক্তঃ পঠেদ্দেবীমনাস্তথা । রাজসী বলিদানেন নৈবেদ্যৈঃ সামিষৈস্তথা । সুরামাংসাদ্যুপহারৈর্জপযজ্ঞৈর্বিনা তু যা । বিনা মন্ত্রৈ স্তামসী স্যাৎ কিরাতানাঞ্চ সম্মতা ॥ দেবীমাহাত্ম্যপাঠফলং মন্ত্রঃ সমপ্রদীপে ॥ মাহাত্ম্যং ভগবত্যাশ্চ পুরানাদিষু কীর্ত্তিতং । পঠেদ্ব্রাহ্মণো যেত্তাপি সর্ব্বকামসমৃদ্ধয়ে । সর্ব্বকামসমৃদ্ধ্যেত্তদ্ভক্তিনমিত্তমিত্যে । পঠনশ্রবণয়োঃ পাঠনশ্রাবণয়োঃ পিকার্থে । অত্র পাঠনশ্রবণয়োঃ সর্ব্বেষামধিকারঃ দ্বিজাতীনাং পঠনশ্রবণয়োঃ শূদ্রস্য শ্রবণে অধিকারঃ । অত্র কাম্যত্বেপি সার্ত্তকর্ম্মত্বেন প্রাপ্তি সম্ভবাৎ যথাযথং পরিহ্যামিত্যাগামীতি সঙ্কল্পাদৌ প্রতিনিধায়তে । তত্র অত্রানেকার্থসাধ্যত্বে সামান্যকত্তিথ্যল্লেখানন্তরং যাবজ্জ্ঞাত উক্তসামাং যাবৎ প্রত্যহং বার্ষিকশরৎকালীনদুর্গাপূজনমিতিপ্রয়োগঃ । বসন্তকালে তু বসন্তকালীনদুর্গাপূজনমিতি বিশেষঃ অন্যথা সঙ্কল্পকালীনতিথেরনাদিনৈঃ সম্প্রদানত্বাপত্তেরিতি । তত্র কৃত্যে চৈত্রস্যাশ্বিনস্য শুক্লস্য পক্ষযোর্মাসীয় কৃষ্ণনবম্যাদি তত্র কৃত্যপ্রতিপদাদি ষষ্ঠ্যাদি সপ্তম্যাদি মহাষ্টম্যাদি কেবলমহাষ্টমী কেবলমহানবমী পূজাকল্পাঃ সপ্তকল্পা উক্তনুয়াঃ । তত্র নবমশোঠমপিন প্রতিবর্ষং সঙ্কল্পাস্যাবশ্যকর্ত্তব্যতাদিতি । গৃহীতস্ব ধূপকর্ম্ম যজমানাদ্যু কীর্ত্তিত হ্রিয়তেত্যস্য ব্যাখ্যানাবসরে কালবিবেকপ্রণাড়িকা তন্মতং ॥ ০ ॥ অথবো

ধননবমীতিথৌ ॥ ভবিষ্যপুরাণে ॥ ইষে মাসি সিতে পক্ষে কন্যারাশিংগতে রবৌ । নবম্যাং বোধয়েদ্দেবীং ক্রীড়াকৌতুকমঙ্গলৈঃ । ইষে ইতি শুক্লাদি প্রাশস্ত্যান্নাশ্বিনেঽপরং । অতএব কালকৌমুদ্যাদিধৃতং । কর্কিণ্যর্কে হরৌ সুপ্তে শ
ক্লপক্ষে ক্রিয়াশ্বিনে । তুলায়াং বোধয়েদ্দেবীং বৃশ্চিকে তু জনার্দ্দনং । বোধয়েদিতি বিষয়ীস্মিতি শেষঃ । অত্রাপি নবম্যাং বোধনং কন্যায়ামেব তন্মতে ব সম্ভবাৎ । তেন সিংহার্কে তুলার্কে চ পিত্রাশ্বিনত্বেন বাক্যদ্বয়ং কন্যার্ক
গুণফলায় ক্বচিৎ সিংহার্কেঽপি । এবঞ্চ চান্দ্রাশ্বিনমানতো মলমাসে কন্যার্কে ন তদারম্ভস্ততে কিন্তু যদি পূর্ব্বমারব্ধং তদা মলমাসেঽপি দেবীপূজাং ত্বমাহাত্ম্য পাঠাদিকং প্রবৃত্তং কার্য্যমেব আরব্ধত্বাৎ শ্রী ২
দশম্যাঞ্চ যাবৎ প্রপূজয়েৎ পর্ব্বতরাজপুত্রীং ইতি জীমূতবাহনধৃতবচনাৎ । আরব্ধং মলমাসাৎ প্রাক্ যৎ কর্ম্মনসমাপিতং । আগতে মলমাসে চ পিতৎ সমাপ্যং ন সংশয়ঃ ইতি কালমাধবীয়ধৃতকাত্যায়নবচনাৎ ।
দেবীপুরাণং ॥ আর্দ্রায়াং বোধয়েদ্দেবীং মূলেনৈব প্রবেশয়েৎ । পূর্ব্বোত্তরাভ্যাং সম্পূজ্য শ্রবণেন বিসর্জয়েৎ ॥ নক্ষত্রযোগঃ ফলাতিশয়ার্থঃ । তিথিনক্ষত্রযোর্যোগে দ্বয়োরেবানুপালনং । যোগা
ভাবে তিথির্গ্রাহ্যা দেব্যাঃ পূজনকর্ম্মণি ইতি দেবলবচনাৎ । তচ্চ যদ্দিনে নবম্যাং আর্দ্রাযোগস্তদৈব বোধনং তু যদিনে তৎ পূর্ব্বদিনে যুগ্মাৎ । পূর্ব্বাহ্ণ তৎকালে দিবামাত্রেঽপি নবম্যামার্দ্রানাভেতরে
বোধনং । কন্যায়াং কৃষ্ণপক্ষে তু পূজয়িত্বার্দ্রকে দিবা । নবম্যাং বোধয়েদ্দেবীং মহাবিভববিস্তরৈঃ ইতি লিঙ্গপুরাণে দিবাকর্ত্তব্য বোধনাৎ । কন্যাদিমীনপর্য্যন্তং যত্র সন্ধ্যা চ তোশিবঃ । তত্র বোধঃ প্রকর্ত্তব্যো
দেব্যা রাজ্যং শুভপ্রদঃ ইতি জ্যোতির্বচনাৎ । অতএব রাত্রিসঙ্কেতে তৎকালেঽপি বিহিতঃ স্নানং নমস্যবারুণমী বেলাপ্রবিষ্টত্বাৎ । শিবমার্দ্রা । যত্র তু পূর্ব্বদিনে পূর্ব্বাহ্ণে তৎকালে নবম্যামার্দ্রাযোগঃ পরদিনে পূর্ব্বাহ্ণে তদা

পরদিনএব পূর্ব্বাহ্নে বেদবানামিতি স্মৃঃ উক্তদিবাপদেন প্রাপ্তে সামান্যকালস্য গৌণত্বাচ্চ । উক্তযদিনে পূর্ব্বাহ্নে নবমীনাস্তে পরদিনপূর্ব্বাহ্নে নক্ষত্রনাস্তে পরদিনএবাবোধনং নতুযুগ্মানুরোধাৎ পূর্ব্বদিনে যুগ্মবাধকপূর্ব্বা
হ্নেনক্ষত্রানুরোধাৎ । উক্তযদিনেনক্ষত্রানাস্তে যদ্দিনে পূর্ব্বাহ্নে নবমীনাস্তস্তদ্দিনেকর্ত্তব্যং উক্তযদিনেস্ত্যে পূর্ব্বদিনে যুগ্মানুরোধাৎ । আর্দ্রাবর্হিতবোধনে মন্ত্রান্তরানুপদেশাৎ ওঁ দুর্গে অমন্ত্রঃ প্রণবযুক্তত্বেন মন্ত্রযুক্তত্বে ॥
তথাচযাজ্ঞবল্ক্যঃ ॥ যন্মন্ত্রস্ত্রাতিরিক্তঞ্চ যচ্ছিদ্রং যদযজ্ঞিয়ং । যদমেধ্যমশুদ্ধঞ্চ যাতযামঞ্চ যদ্ভবেৎ । ও ঙ্কারাভিযুক্তেন সর্ব্বঞ্চাবিকলম্ভবেৎ । যত্রপ্রশুবাক্যে মন্ত্রে ওঁ স্ত্রীরাদিশব্দো নাস্তি তত্রাপি ওঁ স্ত্রীবাদিষ্ট
কল্প্যতে মন্ত্রমাত্রস্য প্রণবাদিত্বাৎ । তবঞ্চ বাধাবেরমহামায়াবকুম্ভনাবোধিতাপুরা । তস্মৈবতনরাঃ কু র্য্যঃ প্রতিসম্বৎসরং নৃপ ইতিমন্ত্রনির্দ্দেশাৎ কালেব্রহ্মনাবোধইত্যকালপদস্য দক্ষিণায়নপরং তবানাংরা
ত্রিত্বাৎ । তদ্বিতং কালবিবেকে । অত্রনবম্যাং যক্ষ্যাঞ্চ শক্রজায়াবোধনং । শরৎকালেপুরাযস্মান্নব ম্যাং বোধিতাসুরৈঃ । শারদাসা সমাখ্যাতা পীঠেলোকেচনামতঃ । ইত্যুপক্রম্য কাপ্যমস্যাঃ পূর্বাধ্যোক্তং মিং
ইত্যং দশবাক্যেতিবিতিকানিকাপুরানীয়কামাখ্যাপঞ্চমূর্তিপ্রকরনেনবম্যামপিতৎ শক্রজায়াবোধনস্যবক্ষ্যমা নত্বাৎ । অত্রশরৎকালবোধনীয়ত্বেন শারদাপদব্যুৎপত্তেস্তৎপদংতেনযাদি সারংদদাতীতিব্যুৎপত্তিস্তু
কাল্পনিকী ॥ ০ ॥ অথপ্রতিপদাদিকৃত্যং ॥ তত্রদেবীপুরাণং ॥ কন্যাসংস্থেরবৌ শক্রশুক্লামারভ্যনন্দিকাং । নন্দিকাপ্রতিপদিতি জীমূতবাহনঃ । যদ্দিনে পূর্ব্বাহ্নে মুহূর্তান্যূনপ্রতিপল্লাভস্তদ্দিনে কৃত্যং । উক্তযদিনে তথাবিধনত্তালাভে
পূর্ব্বদিনে যুগ্মাৎ । ভবিষ্যে । কেশসংস্কারদ্রব্যাণি প্রদদ্যাৎ প্রতিপদ্দিনে । পট্টডোরং দ্বিতীয়ায়াং কেশসংযমহেতবে । দর্পণঞ্চ তৃতীয়ায়াং সিন্দুরালক্ত[illegible]কন্তথা । মধুপর্কং চতুর্থ্যান্তু তিলকং নেত্রমণ্ডনং । পঞ্চম্যামঙ্গরাগাং

শুশস্তানঙ্কবনানিহ। কেশমংস্নাবতত্থংগ্রস্নানলক্ষ্যাদিকঙ্কতিকাদি। পট্টতোরবকং জাতত্রিখণ্ডং। তিলকং তিলকাকারং যত্তত্রান্যৎ। নেত্রমণ্ডনং কজ্জলং। অঙ্গরাগান্ চন্দনাদীন্ ॥ অথ ষষ্ঠ্যাদিকৃত্যং ॥ নবম্যাং বোধনা মামর্থেষ্
ষ্ঠ্যামেব বোধনং ওদন্তি বিক্ত কল্পে বোধনাদিকং নাস্তি। ষষ্ঠ্যান্তু কর্মত্রিতয়ং বোধনমামন্ত্রণমধিবাসশ্চ। বোধনাভাবে আমন্ত্রণাধিবাসৌ কর্তব্যৌ। বোধনন্তু যদ্দিনে সায়ং মুহূর্তাদ্ন্যূন ষষ্ঠী নাস্তু দ্দিনে সায়মেব। তথাচ কবি

যে। ষষ্ঠ্যাং বিল্বতরৌ বোধং সায়ং সন্ধ্যাসু কারয়েৎ। সন্ধ্যা মুহূর্তমাখ্যাতাস্থানেবৃত্তে সমা সমৃতা ইতি
ষষ্ঠ্যনাত পরদিনে পূর্বাহ্নে নিষিদ্ধস্তত্রকালে বোধনং বোধয়েদ্বিল্বশাখায়াং ষষ্ঠ্যাং দেবীং ফলেষু চ ইতিকা
তব। তথাচ দেবীপুরাণং। জ্যেষ্ঠানক্ষত্রযুক্তায়াং ষষ্ঠ্যাং বিল্বাভিমন্ত্রণং। নক্ষত্রযোগঃ ফলাতিশয়ার্থঃ। আমন্ত্রণা
শাং বিনাপি বক্ষ্যে সর্বত্র বৈ দুর্গা যাত্রা বিবেকে। নন্দীপুরাণং। পত্রিপ্রবেশাৎ পূর্বেদ্যুঃ সায়াহ্নে বিল্ববাসিনীং।

বনোক্তমৎস্যগ্রন্থা। তদ্দিনে সায়ং তথাবিধ ষষ্ঠী নাস্তে পরদিনে সায়মেব যুগ্মাৎ। তদ্দিনে সায়ং তথাবিধ
পূর্বাহ্নে কেবলষষ্ঠ্যামপি বোধনবিধানাৎ। ষষ্ঠ্যাং বোধনে তু নক্ষত্রানুপদেশান্নৈতদাদরঃ। জ্যেষ্ঠাদ বক্ত আমন্ত্রণ
ধিবাসৌ পত্রিপ্রবেশাৎ পূর্বদিনে যত্নাৎ বিনাপি সায়ং কার্যৌ। কালযাত্রাব্যবস্থিত পূর্বদিনে চতুর্দ
তস্যামামন্ত্রয়েদ্বিদ্বান্ নাত্র ষষ্ঠ্যপেক্ষিতা। মৎস্যসূক্তেপি। জ্যেষ্ঠাবাপ্যথবাষষ্ঠী সায়ংকালে ন চেদ্ভবেৎ

। সায়মেব তদাপি স্যাৎ বিল্বশাখাভিমন্ত্রণং। পূর্বাং ষষ্ঠীং সমাশ্রিত্য সায়ং প্রাপ্তামপি ত্যজেৎ ॥ আমন্ত্রণবদধিবাসবিধিমাহ স্মৃতিঃ ॥ সায়ং ষষ্ঠ্যান্তু কর্তব্যং পার্বত্যা অধিবাসনং। ষষ্ঠ্যভাবে তু কর্তব্যং সপ্তম্যামপি নারদ। বসন্ত
কালীন পূজায়ান্তু বোধনক্রিয়া নাস্তি বোধিতায়াঃ বোধনাসম্ভবাৎ ॥ ০ ॥ অথ সপ্তম্যাদিকৃত্যং ॥ নন্দিকেশ্বরে। আদ্রানেন্দু ক্রমেণৈব সপ্তম্যাদিদিনত্রয়ে। তত্র পূজাবিশেষেণ কর্তব্যা মম মানবৈঃ। দেবীপুরাণং। সপ্তম্যাং মূল

২ স্বা ২

৪

যুক্তায়াং পত্রিকায়াঃ প্রবেশনং । অত্র নক্ষত্রযোগঃ ফলাতিশয়ার্থঃ । তথাচ লৈঙ্গে মূলাভাবেহপি সপ্তম্যাং কেবলায়াং প্রবেশয়েৎ । তিথিতত্ত্বেহপ্যেবমেব ঋক্ষযোগঃ ফলোদ্রেকঃ । নন্দিপুরাণে । মূলক্ষযোগানুবোধনবাস্ত্রোণপত্রীপ্রবেশনং । বিসর্গ
শ্রবণে যস্মাৎ তস্মাদ্রাষ্ট্রং বিনশ্যতি ॥ উক্তযদিনে কর্মযোগ্যসপ্তমীলাভস্তদ্দিনে তৎপূজাদিকং কার্য্যং । যুগাদ্যা বর্ষবৃদ্ধিশ্চ সপ্তমী পার্ব্বতীপ্রিয়া । রবেরুদয়মীক্ষন্তে ন তত্র তিথিযুগ্মতা ইতি দেবীপুরাণবচনাৎ বক্ষ্যমাণবচনাচ্চ । যুগা
দ্যাশ্চতস্রঃ বৈশাখশুক্লতৃতীয়া লৌনতস্ত্রীয়কৃষ্ণত্রয়োদশী কার্ত্তিকশুক্লনবমী মাঘপৌর্ণমাসী চ । যুগাদ্যাবি বেচনং গ্রাহ্যবিবেকে দ্রষ্টব্যং । বর্ষবৃদ্ধির্জন্মতিথিঃ পার্ব্বতীপ্রিয়া পত্রীপ্রবেশনসপ্তমী ন তত্র তিথিযুগ্মতা অত্রা
ন্যূনযুগ্মবচনস্যাদরঃ । কালাদর্শশ্রীকরমিশ্রাস্তু বৈশাখশুক্লসপ্তম্যাং জাহ্নবী জহ্নুনা পুরা । ক্রোধাৎ পীতা পু নস্ত্যক্তা কর্ণরন্ধ্রাত্তু দক্ষিণাৎ । তস্যাস্তু পূজয়েদ্দেবীং সর্ব্বকামবিনাশ্যায়েতি স্মৃতেস্তস্যাং দেবীপূজনং কার্য্যং দে
বী তত্র গঙ্গা । তত্তিথেরপি উক্তযদিনে পূর্ব্বাহ্নলাভস্তদ্দিনে তৎপূজা কার্য্যা । যথা গৌরী তথা গঙ্গা তস্মাৎ গৌর্য্যাস্তু পূজনে বিধির্যোক্তো দ্বিজসত্তমঃ সোঽত্র গঙ্গায়াস্তু প্রপূজনে ইতি ভবিষ্যপুরাণীয়বচনেন গৌরীপূজনাদেব গ
ঙ্গাপূজনস্যাপ্যুক্তত্বাদিতি কেচিৎ । বাণোক্তেনৈব দেবীপূজাধিকারে সপ্তমীব্যবস্থায়াং ষষ্ঠীমতেভ্যো ইত্যাদিব চনেন যুগ্মবচনস্যৈকবাক্যতয়া স্নানযোগ্যসপ্তমীপ্রভাতিবিতঃ সূর্য্যোদয়কালসপ্তমী গ্রাহ্যা এব যুগ্মবচনাদ্বাব
শ্যমুন্নেয়া ইত্যাকিঞ্চিৎ । নন্দিকেশ্বরে তু ভাবদ্যাঃ প্রবেশাদিবিসর্গান্তাশ্চ যাঃ ক্রিয়াঃ । তিথাবুদয়গামিন্যাং সর্ব্বাস্তাঃ কারয়েদ্বুধঃ । কৃত্যনারায়ণ্যাং । শরৎকালে মহাপূজাদিষু তু যথা বার্ষিকী । সা কার্য্যোদয়গামিন্যাং ন তত্র তিথি
যুগ্মতা । অত্র শরৎকালে ইতি নিমিত্তত্বেন শ্রুতেঃ এবং বার্ষিকীতি শ্রুতেশ্চ দুর্গাপূজায়া বিশেষণত্বেন বার্ষিকশরৎকালীনদুর্গাপূজা ইত্যুল্লেখ্যা ॥ জ্যোতিষে সপ্তম্যামনুগায়াং যদি বিশাখিত্রং পত্রিকাশ্রীফলাঢ্যা । ব্রাহ্মঃ সপ্তা

দ্বারাজ্যং জনসুখমখিলং শক্তিমূলানুবোধাৎ । তস্মাৎ মর্ত্ত্যোদয়কালং নবপত্রিসুরক্তাং সপ্তমীং প্রাপ্য দেবীং স্থাপনোৎবেশয়েত্তাং সকলজনহিতাং বাহ্যসর্বং বিহায় ॥ বাহ্যসর্বং মূলা । উক্তযদ্দিনে তদয়গামিন্যত্তু নপরদ্দিনে তত্রিমনন্তে
নাকর্মণ্যত্বাৎ কিন্তু পূর্বদিনে । কৃতিতিথিক্ষয়াদনুদয়গামিন্যামপি । তথা চ ভবিষ্যে । এতৎপ্রভৃজয়োদ্দেবীং সপ্তম্যাদিদিনত্রয়ে । দ্রক্ষ্যং চতুর্বর্গত্তিরা তামসবৃত্তিরসাত্ত্বিক্যঃ । অসমাপ্তব্রতং দেবীপুরাণে । মহাব্রতং মহাপু 
ণ্যং শক্রবাজৈরনুষ্ঠিতং । কর্ত্তব্যং সুরবাজেন্দ্রৈ দেবীভক্তিসমন্বিতৈঃ । ভাগবতেঽপি । হেমন্তে প্রথমে মাসি নন্দব্রজকুমারিকাঃ । চেরুর্হবিষ্যং ভুঞ্জানাঃ কাত্যায়ন্যর্চনং ব্রতং । ভবিষ্যোত্তরে । প্রাতরাবাহয়েদ্দেবীং
প্রাতরেব প্রবেশয়েৎ । প্রাতঃ প্রাতস্তু সম্পূজ্য প্রাতরেব বিসর্জয়েৎ । যত্র তিথিক্ষয়োত্তবতি তত্র প্রাতঃকালে তিথেরলাভাৎ প্রাতঃ পদং পূর্বাহ্নপরং ॥ তথা জ্যোতিষে ॥ পূর্বাহ্নে নবপত্রিকাপ্রবেশকরা সর্বার্থসিদ্ধি
প্রদা স্যাদারোগ্যং ধনদা করোতি বিজয়ং পত্রীপ্রবেশে শুভা । মধ্যাহ্নে জনপীড়নক্ষয়করী সংগ্রামমারোবাবহা সায়াহ্নে বধবন্ধনাদিকলহং সর্বক্ষতং সর্বদা ॥ পত্রীপ্রবেশনং রাত্রৌ বিসর্গং বা করোতি যঃ । তস্য রাজ্য
বিনাশঃ স্যাৎ রাজা চ বিকলো ভবেৎ । দেবীপুরাণে । দ্বিশরাবেঽঠবেঽঠেবলগ্নকেন্দ্রগতেরবৌ । বর্ষে বর্ষে বিধাতব্যং স্থাপনঞ্চ বিসর্জনং । দ্বিশরাব্রবকন্যায়াং শুক্লায়াং ষষ্ঠ্যাং সপ্তমীক্রমেণ পরদিনে সুরস্কুর্ত্তা
ন্নূনসপ্তমীনাড়েবা চরলগ্নপ্রাপ্তৌ বৃশ্চিকে চ তদভাবে পত্রীপ্রবেশনং । তথা চ দেবলঃ । চরলগ্নে চরাংশে বা দেবানি যত্তমানসঃ । প্রতিমাসু সর্বং কুর্যাৎ স্থাপনঞ্চ বিসর্জনং । চরলগ্নং তু নালগ্নং অংশো হি তন্বাংশঃ ।
দেবীপূজা স্থানং মঃ স্মৃতে ॥ সুধূপ্তেনার্চয়েদ্দেবাং নত্রীর্নেচকদাচন । নেষ্টকারচিতস্থানে নাপ্যস্থিতিবিবর্জিতে । নেষ্টকারচিতগৃহে হ্যপি মৃত্তিকাবেদিকোপরি পূজনমিতি শিষ্টাচারঃ ॥ ০ ॥ অথপ্রান

প্রতিষ্ঠামন্ত্রঃ ॥ শারদায়াং । পাশাঙ্কুশপুটশক্তির্বাণীবিন্দুবিভূষিতাঃ । যাদ্যাঃ মন্তুসকারান্তা ব্যোমসত্যেন্দুসংযুতাঃ । অদ্যেহংসমন্ত্রঃ স্যাত্তত্রোহংমুখ্যপদং বদেৎ । প্রাণা ইতি বদেৎ পশ্চাদিহ প্রাণাস্ততঃ পরং
। অমুষ্য জীব ইহ স্থিতস্তত্রোহংমুখ্যপদং বদেৎ । সর্ব্বেন্দ্রিয়াণ্যমুষ্যাপ্তে বাঙ্মনশ্চক্ষুরন্ততঃ । শ্রোত্রঘ্রাণপদে প্রাণা ইহাগত্য সুখং চিরং তিষ্ঠন্তু স্বাহেত্যন্তে প্রাণমন্ত্রোহয়মীরিতঃ । প্রাণমুষ্যপদাং দ্বকং
পাশাদীনি নিযোজয়েৎ । পাশাঙ্কুশপুটাশক্তি বিলানেন প্রথমং পাশবীজং আং ততঃ শক্তিবীজং হ্রীং ততঃ অঙ্কুশবীজং ক্রোং বা ণী যকারঃ বিন্দুবিভূষিতঃ তেন যাদ্যাঃ মন্তুসকারান্তাঃ তেষ্বপি
যকারমাদায় মন্তু শ্রতিক্তিন্নং বীজং দ্বয়ং পৃথক্ তু স্থাবস্থ সন্তানামপি সবিন্দুত্বমাপনায় । ব্যোমঃ হকারঃ সত্য ত্তকারঃ ইন্দু বিন্দুঃ তেন হ্রোং বিশেষস্তু দুর্গোৎসববিবেকেহনুসন্ধেয়ঃ
॥০॥ অথ পূজামন্ত্রঃ ॥ তত্র কালিকাপুরাণং ॥ ত্ত্বক্ষর মন্ত্রেণ পাদ্যাদীন সমর্পয়েৎ । বিতরে দূণাদরাং স্বপর্ব্বাঙ্গোং শেষতত্ত্বের । হ্রত্বক্ষারেণ তবনেশ্বরীবীজেন । অগ্নিপুরাণং অগ্নি
ঙ্কৈঃ পূজয়েন্মন্ত্রৈঃ সর্ব্বানন্দেবান্ সমাহিতঃ । ধ্যাত্বা প্রণবপূর্ব্বন্তু তন্নামানুসমাহিতঃ । নমস্কারেণ পুষ্পাণি বিন্যসেচ্চ পৃথক্ পৃথক্ । তেন ওঁ হ্রীং দুর্গায়ৈ নমঃ ইতি মন্ত্রঃ প্র
তীয়তে । তত্রাদ্যমাংগুরুকালীং দক্ষযজ্ঞবিনাশিনী । আবির্ভূতা মহাঘোরা যোগিনীকোটিভিঃ সহ । অতোহত্র পূজনীয়া মাতস্মিন্নুহনি মানবৈ বিভি ব্রহ্মপূরানন্দশনাৎ দক্ষযজ্ঞবিনাশিনীতি স

ক্রেণপূজা ॥ ০ ॥ অথনবপত্রিকা ॥ উত্তরকালিকাপুরাণং ॥ সপ্তম্যাংবিল্বশাখাংতামাহৃত্যপ্রতিপূজয়েৎ । বিল্বযুগ্মসমাযুক্তম্যাগবাক্ষতরুক্তে । বায়ব্যাস্যংবাক্যমন্ত্রংনগৃহীয়াৎকদাচন । বৃহন্নন্দিকেশ্বরে । সপ্তম্যাং
পত্রিকাপূজাবস্ত্রাদিনবতিযুতা । রম্ভাকচ্বীহরিদ্রাচজয়ন্তী বিল্বদাড়িমৌ । অশোকোমানকশ্চৈবধান্যঞ্চনবপত্রিকা । সর্ব্বময়ীস্বমূর্ত্তির্মেপূজ্যায়ুর্ধনবৃদ্ধয়ে । পূজ্যতেতিশেষঃ । অরুণোদয়কালীনঘটিকাম্না
ত্রতিথৌসপ্তকপূজনামামার্থকালিকাপুরাণং ॥ সপ্তকাকল্পোদিতাংপূজাংযদিকর্ত্তুংনশক্নো তু । উপচারাংস্তথাদাতুংপঞ্চৈতান্বিতরেত্তদা । গন্ধংপুষ্পাঞ্চধূপঞ্চদীপংনৈবেদ্যমেবচ । অত্র
বেশ্মস্থাতোয়াভ্যাংকেবলেনজলেনবা । সংক্ষেপপূজাকথিতাতথাবস্ত্রাদিকংপুনঃ ॥ ০ ॥ অথমহা ষ্টমীকৃত্যং ॥ উত্তরদেবীপুরাণং ॥ পূর্ব্বাষাঢ়াযুতাষ্টম্যাংপূজাহোমাদ্যুপোষণং ।
নক্ষত্রযোগঃফলাতিশয়ার্থঃ ॥ প্রাবৃট্কালেবিশেষেণআশ্বিনেকৃষ্ণসপ্তমী ॥ মহাশব্দোনবম্যা ন্তেনোক্তিখ্যাতিংগমিষ্যতি । ইতিকৃত্যসমুচ্চয়বাক্যপ্রামাণ্যেনপ্রাবৃট্কালে সামন্তষষ্ঠ্যা সকব
ষ্ঠীকালে । তেনমহাষ্টমীমহানবমীতিনিমিত্তেনোল্লেখঃ । পরদিনেমুহূর্ত্তন্যূনেযৎপরবিদ্ধাগ্রাহ্যাৎযুগ্মাৎউদয়গামিত্বাচ্চ । সপ্তম্যামষ্টমীক্ষয়েনন্দযগামিন্যামপি ॥ অথস্নানং ॥ বৃহন্নন্দিকে
শ্বরে ॥ অষ্টমীনবমীপূর্ণাতিথিঃপ্রীতিকরীমম । কুর্যাত্তত্রমহাস্নানংগীতবাদ্যপুরঃসরং ॥ কুর্যাদিতিকারয়েদিত্যর্থঃ । সংস্নাপ্যকে স্নাপয়েদ্দেবীংতোয়েনপ্রতিমায়াশ্চদর্পণে । দর্পণে ইতি মৃন্ময়প্রতি শ্রী ৭

মাপক্ষে । ব্রাহ্মে । দেবানাং প্রতিমা যত্র ঘৃতাভ্যঙ্গং সমাচরেৎ । পলানি তস্য দেয়ানি প্রাজ্ঞ্যাঃ পঞ্চবিংশতিঃ । অষ্টোত্তরং পলশতং স্নানে দেয়ন্তু সর্ব্বদা । ভবিষ্যে । স্নানং শতপলৈঃ প্রোক্তং অভ্যঙ্গঃ পঞ্চবিং
শতিঃ ॥ দ্রুমসহস্রেণ পলানান্তু মহাস্নানং প্রকীর্ত্তিতং । দশপলাদি স্নানমাহুক্ষোভিত্বে । দধ্নাঽথ মধুনা তৈলৈর্ঘৃতেন পয়সা তথা । কুর্য্যাত্তু মহাস্নানং পঞ্চগব্যামৃতৈস্তথা । বাক্ষোনাদিকষায়ৈশ্চ
গঙ্গাতোয়ৈস্তীর্থবারিভিঃ ॥ ওষধীভিশ্চ [illegible] সর্ব্বৌষধিগন্ধাদ্যৈঃ কলসৈস্তথা । পুষ্পাক্ষতাদিভিস্তা ব্যোম্নগন্ধৈর্ম্মলয়জাদিভিঃ । কারয়েদষ্টধা স্নানং শ্রীনরেন্দ্রস্নুবাবিনা । লিষ্কৃপদ্বৈস্তু গঙ্গাস্তে
র্দ্ধ্বযোষ্তৃতমস্তুতঃ । পঞ্চগব্যমাহমন্ত্র । গোমূত্রং গোময়ং ক্ষীরং দধিসর্পিঃ কুশোদকং । পঞ্চ গব্যমিদং প্রোক্তং বিধেয়ং সর্ব্বকর্ম্মসু । গোশৃঙ্গক্ষালনং প্রোক্তং [illegible] দুগ্ধবি
শ্বাপ্রেদুণং । ঘৃতঞ্চাষ্টগুণং প্রোক্তং পঞ্চগব্যে তথা দধি । কল্পান্তরমাহ তত্রৈব । পলমাত্রং তু স্যাজ্জ্ঞাগং গোমূত্রং তাবদিষ্যতে । ঘৃতঞ্চ পলমাত্রং স্যাৎ গোময়ং তোলকদ্বয়ং । দধিপ্রসৃতিমা
ত্রং স্যাৎ পঞ্চগব্যমিদং স্মৃতং । অথবা পঞ্চগব্যানাং সমানো ভাগ ইষ্যতে ॥ উত্তোধনমন্ত্রমাহ শ ঙ্খঃ ॥ গায়ত্র্যাদায় গোমূত্রং গন্ধদ্বারেতি গোময়ং । আপ্যায়স্বেতি বৈ ক্ষীরং দধিক্রাব্ণ ইতি দধি
। তেজোসীতি ঘৃতং দদ্যাৎ দেবস্যত্বা কুশোদকং । পঞ্চামৃতমাহমন্ত্র ॥ দুগ্ধং স[illegible]শর্করঞ্চৈব ঘৃতং দধি তথা মধু । পঞ্চামৃতমিদং প্রোক্তং বিধেয়ং সর্ব্বকর্ম্মসু । পঞ্চকষায়মাহ ভবিষ্যে । জম্বুশাল্মলী

বন্ধুকনবম্যাঃ ১ বকে ৭

বাষ্পানং কদম্বং বকুলং তথা। এতেষাং পুষ্পং নবম্যাং কন্যায়াঃ পবিকীর্ত্তিতাঃ ॥ ওষধী মাহেন্দ্রোপবিমিশ্রং ॥ ব্রীহয়ঃ শালয়ো মুদ্গা গোধূমাঃ সর্ষপাস্তিলাঃ। যবাশ্চৌষধয়ঃ সপ্ত বিপদো ঘ্নন্তি ধারিতাঃ। পঞ্চর
ত্নমাহুর্বিধৌ ॥ সুবর্ণং হীরকঞ্চৈব মানিক্যং মৌক্তিকং তথা। প্রবালঞ্চৈব বিজ্ঞেয়ং পঞ্চরত্নং প্রকীর্ত্তিতং। নবরত্ন মাহ নারদীয়কল্পে। মুক্তা মানিক্যবৈদূর্য্যং রত্নং বিদ্রুমন্তথা। ইন্দ্রনীলং পদ্ম
রাগং গোমেদকং তথা। নবরত্নমিদং প্রোক্তং লক্ষ্মীস্থানমিদং পরং। পূজাদি প্রমাণং প্রয়োগবিন্নূমন্ত্রেষং ॥ ০ ॥ অথ কুমারীপূজা ॥ তদ্বিধৌ। অষ্টম্যাদ্যাসু তথায়াস্তু ব্রদেবার্চ্চনং দিবা। পূজা শ্রী ৬
ত্রবলিদানঞ্চ তত্রৈমাহঃ প্রপূজয়েৎ। কুমারী পূজনীয়াত্র স্বঘনী যাত্র স্বঘনৈঃ ॥ ০ ॥ অথ সন্ধিপূজা ॥ স্মৃতিসাগরে। অষ্টম্যাঃ শেষদণ্ডশ্চ নবম্যাঃ পূর্ব্বদণ্ডকং। তত্র যা ক্রিয়তে পূজা বিজ্ঞেয়া সা মা
হাফলা। অত্র সোয়দ্যপি তেন বিধানাৎ নোক্ততিথিমলদোষঃ। অষ্টমী নবমী যোগো রাত্রিযোগো প্রশস্যতে ॥ অষ্টবারে গতস্তুনং সন্ধ্যায়াং দ্বিগুণম্ভবেৎ ॥ ০ ॥ অথ মহানবমীকৃত্যং ॥ তত্রদে
বীপুরাণং ॥ উক্তবেন নবম্যাঞ্চ বলিভিঃ পূজয়েচ্ছিবাং। অত্র নক্ষত্রযোগঃ ফলাতিশয়ার্থঃ। তল্লোক্ত যদিনে পূর্ব্বাহ্নে কর্মযোগ্যনবমীলাভে পূর্ব্বদিনে নক্ষত্রযোগেঽপি উক্তযুগানি
শাং পরদিনে নত্তু যুগ্মাৎ পূর্ব্বদিনে। অষ্টমী নবমী বিজ্ঞান নবমী চাষ্টমীযুতা। অষ্টনারীশ্বরপ্রায়া উমামাহেশ্বরী তিথিঃ বিনাশ্বিনাধিকারীয বিষ্ণুধর্ম্মোক্তবচনমাত্র প্রদর্শিনাবা লোকেনাত্র

বিষয়েণ পূর্ব্বদিনে নবমীত্বং যুগ্মাদিতিথিষু যুক্তং তত্র ভগবত্যাঃ প্রবেশাদি বিসর্গান্তাস্তু যাঃ ক্রিয়াঃ ইত্যাদিবচনবিরোধাপত্তেঃ । বিষ্ণুধর্ম্মোক্তবচনন্তু সন্ধিপূজাবিষয়মিতি শ্রীকরমিশ্রাঃ । এবমষ্টম্যাঃ ষষ্টি
দণ্ডাত্মকত্বে ষষ্টিদণ্ডাত্মিকা যা সপ্তমী পূজা তৎপরদিনে যথাকথঞ্চিৎ পূজাং কৃত্বা তৎপরদিনে প্রধানমনুষ্ঠেয়মিতি ॥ ০ ॥ অথাষ্টম্যুপবাসাদিঃ ॥ তদ্বিষয়ে । শুক্লপক্ষে তথাষ্টম্যামুপ
বাসপরায়ণঃ । দুর্গেতি নাম জপ্ত্বৈকং পুত্রবান্ ইষ্টশতং নৃপ । অষ্টশতমধ্যে ত্বেকশতমিতি শ্রীকরমিশ্রাঃ । দেবীপুরাণং । একাদশীকোটিসহস্রতুল্যা সিতাষ্টমী পর্ব্বতরাজপুত্র্যাঃ । ত
তোষিস্তু ক্রুদ্ধান্তু নিতাশশতেন পরাশরব্যাসবশিষ্ঠমুখ্যৈঃ । যস্মিন্দিনে মহাষ্টমী পূজা তস্মিন্দিনে তত্রোপবাসঃ নতু সন্ধিপূজাদিনে অষ্টমীত্বেনোপবাসবিধানাৎ । সুতজ্যেষ্ঠপুত্রবতা
গৃহস্থেনাপ্যনুষ্ঠেয়মাহ কালিকাপুরাণং ॥ উপবাসং মহাষ্টম্যাং পুত্রবান্ন সমাচরেৎ । যথা তথা বা পূতাত্মা ব্রতী দেবীং প্রপূজয়েৎ । পুত্রবান জ্যেষ্ঠপুত্রবান্ । উপবাসস্তু তস্যাং বৈ মহাপাতকনাশ
নঃ । গৃহিণা নতু কর্ত্তব্যং জ্যেষ্ঠপুত্রবতা সদা । তেনাত্র বিষয়ান্নং তু জ্যেষ্ঠেনাং পূর্ব্ববচনাৎ যথা তথৈব হবিষ্যান্নাদিনা অত কালিকাপুরাণীয়বচনাত্তু বোদ্ধৃন পুত্রবতা উপবাসত্বে হবিষ্যাদিনা পূজাবিধানাত্ত
স্যাপূজাঙ্গং মহাষ্টমী নিমিত্তকোপবাসনিষেধো নতু প্রতিমাসকর্ত্তব্যাষ্টমী নিমিত্তকোপবাসনিষেধ ইতি শ্রীকরমিশ্রাঃ ॥ কালিকাপুরাণং । অষ্টম্যাং মধু [illegible] ইতি । দুঃ [illegible]
শিবা ২

পাহারেণ দ্যান্নৈবেদ্যমুত্তম । তেনৈব বিধিনানুক্তসূপং তু তজীতনান্যথ । স্ত্রিয়াস্তু মৎস্যো নৈবণাবনং নতু মাংসেন যাশুদ্ধিয়োনৃণাম্ নত্মাদত্তাতিক্তাগবত্তনিষেধাৎ । পারণে মাংসাদিভোজনন্তু পরিসংখ্যা নতু নি শ্রী ৭
যম: অতএব বিবাবাদৌ মৎস্যমাংসং বিনাপ্যষ্টম্যাং পারণাবনসিদ্ধি: ॥ ০ ॥ অথ বলিদানং ॥ মনু: যজ্ঞার্থং ব্রাহ্মণৈর্বধ্যা: প্রশস্তা মৃগপক্ষিণ: । ভৃত্যানাঞ্চৈব বৃত্ত্যর্থমগস্ত্যো হ্যাচরৎ পুরা । অতএব
পশুং পূজাপরং বক্ষ্যমাণবচনৈকবাক্যত্বাৎ । তথা কালিকাপুরাণং । অষ্টম্যাং রুধিরৈর্মাংসৈঃ মহামাংসৈঃ সুগন্ধিভিঃ । পূজয়েদ্বহুজাতীয়ৈর্বলিভির্ভোজনৈঃ শিবাং । বলিভির্মেষমহিষৈর্নৃপস্য সচ্ছাগ
মহিষাদিভিঃ । যত্তু অষ্টম্যাং বলিদানেন পুত্রনাশো ভবেদ্ধ্রুবমিতি দেবীপুরাণীয়ং তদষ্টমীকৃ নেমস্ক্রিয়পূজাবলিদাননিষেধকমিতি শ্রীকরমিশ্রাঃ ॥ বিহিতাবিহিতবলিমাহ কালিকাপুরাণং ।
নরবৈমাসিকান্নানং পশুং দদ্যাচ্চিরাবলিং । নবত্রৈমাসিকান্নানং দেবৈর্দদ্যাৎ পতত্রিণং । কিন্নরা তুলকর্ণাদিভূমিষ্ঠংহিকতথা । কুষ্মাণ্ডমিক্ষুদণ্ডঞ্চ মদ্যমাসবমেবচ । এতে বলিসমাস্তুষ্টৌ
ছাগসমাঃস্মৃতাঃ । চন্দ্রহাসেন কর্ত্রা বা শেষদনং মুখমুক্তয়ে । দেবীপুরাণং । বলিং যে চ প্রযচ্ছন্তি সর্ব্বকৃত্ত বিনাশনং । তথাক্ত তৃমাতেত্যাবৎকল্পত্তু শাক্করং । সর্ব্ব কৃত্তানি বিহিতমহিষাদীনি বি
নাশণতৈ যান্তেষাম্মিন্ বলাবিত্তিবিগ্রহঃ । শাক্করকল্পান্তু ॥ শাস্ত্রবেননিষেধেণ জায়তে ব্রহ্মনঃ শতং । এবং কালবিভাগেন ত্যঃ কল্পাস্তু শাক্করঃ । ইতি দেবীপুরাণোক্তো গ্রাহ্যঃ । ভবিষ্যপুরাণং ।

অজানাং মহিষাণাঞ্চ মেষাণাঞ্চ তথা বধাৎ । প্রীণন্তেত্বিধিবদ্দুর্গাং মাংসশোণিততর্পণৈঃ । মাংসদানফলমাহুস্তথৈব । দুর্গায়া দর্শনং পুণ্যং দর্শনাদপি বন্দনং । বন্দনাৎ স্পর্শনং শ্রেষ্ঠং স্পর্শনাদপি পূজনং ।
পূজনাৎ স্নপনং শ্রেষ্ঠং স্নপনাত্তর্পণং স্মৃতং । তর্পণাদ্বলিদানন্তু মহিষাজনিপাতনং । রুধিরদানফল মাহুস্তথৈব ॥ সুমেকমেকং বরদা তৃপ্তা ভবতি চণ্ডিকা । রুধিরেণোরণস্যৈকং তর্পিতা বিধিবন্নৃপ ।
অজস্য দশবর্ষাণি রুধিরেণ সুতর্পিতা । মাহিষেণ শতং বর্ষং তৃপ্তা ভবতি চণ্ডিকা । মৎস্যমাজিস্তৃপ্তিঃ স্যাৎ সুদেহরুধিরেণ তু । তর্পিতা বিধিবদ্দুর্গা তিষ্ঠাব্দ কুক্কুটস্যকে । ঋক্ষমাংসস্য রুধিরৈঃ শূক
রমৎস্যশোণিতৈঃ । প্রাপ্নোতি সততং দেবী তৃপ্তিং দ্বাদশবার্ষিকীং । অজাবিকানাং রুধিরৈঃ পঞ্চবিংশতি বার্ষিকীং । মাংসৈরপি তথা প্রীতিং রুধিরৈর্যাস্যায়াবতী । বাহ্নিভস্যতু মাংসমাং
সীর্ব্বাতৈব নস্যঠ । তৃপ্তিমাপ্নোতি বর্ষাণাং শতানি ত্রীণি সংপ্রিয়া । তথা বিষ্ণুবীরুক্ষকল্পোক্তঃ ক্রমঃ সর্ব্বত্র সর্ব্বদা । সাধকৈর্বলিদানেষু গ্রাহ্যঃ সর্বসুরস্য চ । পক্ষিনঃ কচ্ছপা গ্রাহ্যা মৎস্যা নবরি
ধান্যকৃতাঃ । মহিষোহজাবিকা শাবঃ ছাগাবন্ধ্য শম্বুকরঃ । খড়্গাশ্চ ঋষ্যমাবস্যকান্যধিকাম ব্রতাঙ্কিঃ । শার্দ্দুলশ্চ নবশ্চৈব স্বগাত্ররুধিরন্তথা । চণ্ডিকাভৈরবাদীনাং বলয়ঃ পরিকী
র্ত্তিতাঃ । অজাবিকঃ পাবিতারিকঃ । অবেরজায়াং জাতো যোনন্নাম্নোহজাবিকঃ স্মৃত ইতি করমিশ্রাঃ । ঔরভ্রো মেষঃ । পশুঘাতশ্চ কর্ত্তব্যো গবলাজবধস্তথা । ইতি বিষ্ণুধর্ম্মোত্তরীয়ে ইতিপ্রায়ো

গঃ কার্য্যঃ । যত এব দেবীশ্রাংপ্রজয়িষ্যাস্তু সর্ব্ববাস্বরং ষষ্ঠে সীঘ্রং । ধ্যাতয়ন্তি যশু নত্ত্বা ক্রেতুবন্তিসম্ভাবনাঃ ॥ বলিং যে তু প্রযচ্ছন্তি সর্ব্বশত্রুবিনাশনং । তস্মাৎ তুষ্টা তে দেবী যাবৎ কল্পং তু শাশ্বতং বসিত্বা দে
বীপুরানীয়েন পশুঘাত বলিদানযোঃ পৃথক্কথম ভিত্তিং । আগাদৌ পশুপ্রযোগমাহ যজুর্পার্শ্বঃ ॥ উষ্ট্রো বা যদি বা মেষশ্ছাগো বা যদি বা হয়ঃ । পশুস্নানেন নিযুক্তানাং পশুশব্দো
বিধীয়তে । কালিকাপুরানং । পূজামুনা মমাং মানিদত্যাদ্যৈ সাধকঃ । মাংসত্ত লোহিতং শীর্ষ মদ্দ ততুক্তজায়তে । শোনিতং মণ্ডপ্রত্ত শীর্ষং পীযূষমুচ্যতে । তস্মাৎ পূজনে দদ্যাদ্বলেঃ শীর্ষক
শোনিং ॥ মমাং মকধিরদানমাহ শ্রীদত্তোণাধ্যায়স্তু সময়প্রদীপে ভবিষ্যপুরানং ॥ লোমবন্ত্রানি বাজ্ঞে ত্রবস্থানি বিবিধানি চ ॥ মমাং মকধিরে দেবী মাতৃষ্টা ভিন্নবৎসর শতমিতি ॥ মহিষস্য সমাং মকধি
বদানং নিষিদ্ধং তদাহ ভবিষ্যোত্তরং ॥ নদদ্যান্মাহিষং মাংসং সমকথ্য সাধকঃ ক্বচিৎ ॥ দদ্যাদিষ্টে ফলস্তুস্য কষ্টাদ্দুন্তিকানিকা ॥ কেবলক্ধিরদানমিতি শ্রীকরমিশ্রাঃ ॥ বস্তপশুষ্যাত্ত হপি
একবচনান্ত বস্তঃ প্রায়োক্তো নবকুবচনাদ্ব্যনোরপি ইতি সুরক্ষিবিবেকে নবঃ পঙ্ক্তি মাগতমিপধ্যি কারেৎ নমাধেনং ॥ ভবিষ্যপুরানং । এতামশ্চ জয়েদেবীং নন্দস্যাদিদিনত্রয়ে । রূক্যাংস্তু
বাহা তির্ব্বা কামবৃষ্ক্ষিবমাক্তিথঃ । ইতি ॥ নগাষ্টাহ্নবিসৃজত্যক্তং তদহে নতুপার্ব্বতীং । নূনাধিকং নকর্ত্তব্যং বাক্তা বাস্তুধনক্ষয়াদিতি নিষ্ক পুরানাদ্যেনাস্য বিরোধ ইতি বাচ্যং । পূর্ব্ববচনং পূজা

নূন্যেধেনন্যূনাধিকদিনস্থিতিস্থাপনায় পূর্ব্ববচনন্তু অত্র পূজানন্তরং বিসর্জ্জনানুরোধেন ন্যূনাধিকপ্রশঙ্কৌ তন্নিষেধার্থং প্রভিদন্তাম্বিকায়ানবম্যাঃ পরদিনে তিথিমনষ্ঠাং কর্ম্মাযোগ্যতা ও পরদিনে দশমীকর্ম্ম
যোগ্যাস্তত্রাধিকপ্রশঙ্কৌ তন্নিষেধার্থঞ্চ। অশ্রাতনন্তর্বোরঙ্গেনবিরোধঃ। পূর্ব্বাহ্ণাদ্যযুতাষ্টম্যাং পূজাহোমাদ্যনুষ্ঠানমিতি দেবীপুরাণী যেন হোমস্তুতেঃ নবম্যাং বলিদানন্তু কর্ত্তব্যং বৈ যথাবিধি।
জপং হোমশ্চ বিবিধং কর্য্যাস্তত্রবিভূতয় ইতি কালিকাপুরাণী যেন হোমস্তুতেঃ উক্তযত্তকস্মিন্নবাহোম: । হোমঞ্চজাজপমন্ত্রস্তু দেবীপুরাণে। পূজয়েত্তিন হোমেন্দ্র্যধিক্ষীরঘৃতাদিভিঃ। কুর্য্যাদেবমাত্তু
মন্ত্রেণ ইত্যভিধায় জয়ন্তীমঙ্গলাকালীভদ্রকালীকপালিনী। দুর্গাশিবাক্ষমা ধাত্রী স্বাহা সুধান মোস্তুতে। অনেনৈবতুমন্ত্রেণজপহোমৌতুকারয়েৎ। বিল্বপত্রৈর্ঘৃতাক্তৈস্তিলধান্যাদিসংযুতৈরিতি
ইত্যন্দিকেসূবণুবানাদ্বিলপত্রাদিকমপিদেয়ং॥ সহাকপিলপঞ্চরাত্রে॥ সংখ্যানুক্তৌশতংমাষ্টং সহস্রম্বাজপাদিষু। হোমোগ্রহাদিপূজায়াং শতমষ্টাধিকং ভবেৎ। অষ্টাবিংশতিরষ্টৌবাশক্ত্যা
লেক্ষমথাপিবা। ভবিষ্যে। আকৃতিস্তু ঘৃতাক্তানাং শ্রুবেনাধোমুখেনতু। জ্বলেত্তিনাক্ষাকৃতিস্তু দেবেনোক্তানপানিনা॥ স্মৃতিঃ মন্ত্রেনোঙ্কারবদ্ধস্তেন স্বাহান্তেন বিচক্ষনঃ। স্বাহাবসানেজুহুয়াৎ
ধ্যায়েদ্বৈ মন্ত্রদেবতাং॥ কপিলপঞ্চরাত্রে॥ সর্ব্বাধিকারিকং কুণ্ডং চতুরস্রন্তু সর্ব্বদং। অস্রং কোনং। ভবিষ্যোত্তরে। সহস্রেত্বথহোতব্যে কুর্য্যাৎ কুণ্ডং করাত্মকং। দ্বিহস্তমযুতেত্বেবলক্ষহোমেচতুষ্করং। ইতি

কৃত্বা প্রণম্য প্রতিষ্ঠাবিবেকে নুসন্ধেয়ঃ ॥ ০ ॥ অথ মহাপূজাদক্ষিণা ॥ আশ্বিনে শুক্লপক্ষে তু কর্ত্তব্যং নবরাত্রিকং । প্রতিপদাদিক্রমেণৈব যাবচ্চ নবমী ভবেৎ । ত্রিরাত্রং বাপি কর্ত্তব্যং সপ্তম্যাদি যথাক্রমং ইত্যুক্তবিষ্ণু
বানবচনে পূজনস্য নবম্যন্তত্বপ্রতীতেস্তদানীং এতস্মিন্ দক্ষিণা দেয়া ইত্যুক্তদোষগণবিশিষ্টে ন দক্ষি নান্তবিধানাৎ । এতস্মিন্ ইতি কর্ম্মকতুপলক্ষণং । নবম্যাং পূর্ব্ববৎ পূজা কর্ত্তব্যা স্তুতিমিক্তা । দক্ষি
নাবস্ত্রযুগ্মঞ্চ আচার্য্যায় নিবেদয়েদিতি মৎস্যসূক্তাৎ । গৃহ্যাগ্নৌ হবিষ্বিসর্জনাৎ পূর্ব্বং দক্ষিণা বিহিতা । তদ্যথা । ততঃ শান্তিং প্রকুর্ব্বীত স্ববর্ধাবনয়াচনং । দক্ষিণাপ্রদানার্থগ্রহাদীনাং বিসর্জনং
॥ ০ ॥ অথ দশমীকৃত্যং ॥ উক্তং দেবেন নবম্যান্তু বলিভিঃ পূজয়েচ্ছিবাং । শ্রবণেন দশম্যান্তু প্রণিপত্য বিসর্জ যেৎ ॥ কৃষ্ণনন্দিকেশ্বরপুরাণং ॥ নৌযানেন বিযানেন বা নীত্বা ভগবতীং শিবাং । স্রোতোজলে প্রক্ষিপে
য়ুঃ ক্রীড়াকৌতুকমঙ্গলৈঃ ॥ পত্রৈর্নাক্ষিপ্য তোয়স্য পত্রান্নাক্ষিপন্তু যঃ । তস্মাদ্দুঃখং ভগবতী শা পং দত্ত্বা সুদারুণং ॥ মঙ্গলানিষ্ঠাভিধান নৃত্যগীতাদিকং কর্ত্তব্যং ॥ উক্তং কালিকাপুরাণং ॥ বি
সর্জনং দশম্যান্তু কুর্য্যাদ্বৈ শাবরোৎসবৈঃ । ধূলিকর্দ্দমবিক্ষেপৈঃ ক্রীড়াকৌতুকমঙ্গলৈঃ । ভগলিঙ্গাভিধানৈশ্চ ভগলিঙ্গপ্রগীতকৈঃ । ভগলিঙ্গক্রিয়াভিশ্চ ক্রীড়য়েয়ুরলং জনাঃ ॥ দশ
ম্যাং শীঘ্রতো যত্র বনিদানতুমানবৈঃ । ততঃ শ্রুং নাশমায়ান্তি সর্ব্বকোপদ্রবৈঃ স্ফুটং । ক্রমিকস্যাহ পূজনে কৃত্বা নবম্যাঃ প্রান্তিকশ্চ । তস্মাৎ কেন নবমীপূজাহ তা যদি বন্ধে দশমী মনস্তত্রাপি তাং বিরা

শ্রী ৭

যনবমীযুক্তদশম্যাং পূর্ব্বাহ্নে দেবীবিসর্জনং কার্য্যং। অষ্টাহে বিসৃজেৎ শক্রং তদর্দ্ধেনতু পার্ব্বতীং। ন্যূনাধিকং নকর্ত্তব্যং রাজ্যোরাষ্ট্র ধনক্ষয়াদিতি লিঙ্গপুরাণীয়েনাপি ন্যূনাধিকনিষেধাৎ। অত্র
প্রাতর্বারাহয়েদ্দেবীং প্রাতরেবপ্রবেশয়েৎ। প্রাতঃ প্রাতস্সমস্ত্যজ প্রাতরেব বিসর্জয়েদিতি ভবিষ্যপুরাণেনতু প্রাতঃপদং পূর্ব্বাহ্নপরং॥ দেবীপুরাণং। ততোমিষ্টপ্রদানেন তু আশ্রয়ং থাদি
পল্লবৈঃ। তথধী তিস্তম্ভে ধ্যাতিঃ সর্ব্ববীজৈর্যবাদিভিঃ। নবম্যাং পর্ব্বকালেতু যাত্রাকালে বিশেষতঃ। যঃকুর্য্যাৎ শস্যধীবাবদেব্যানীরাজনং নরঃ। শঙ্খসূর্য্যাদিনির্ঘোষৈর্জয়শব্দৈশ্চ
পুষ্কলৈঃ। যাবন্তোদিবসানবীর দেব্যানীরাজনং কৃতং। তাবৎ কল্পসহস্রাণি দুর্গালোকে মহীয়তে॥ যস্তু কুর্য্যাৎ প্রদীপেন মূর্দ্ধ্নো লোকং মহাকৃতি ইতি শিবরহস্যে যাত্রাকালে ইতু
পাদানাৎ দেবীতাননানন্তরং পিষ্টপ্রদীপাদিনা নীরাজনং কর্ত্তব্যং॥০॥ অথ দেবীবিসর্জনানন্তরং দশম্যাং খঞ্জনদর্শনং॥ জ্যোতিষে ইন্দ্রানীরাজনং রাজা বনদৃষ্ট্যে যথাবনং। লোক
নং খঞ্জনং পশ্যেৎ জনলোলোকসন্নিধৌ॥ ভদ্রেষু লোমুগজবাজিমহোরকাম্বুরাজ্যপ্রদঃ কুশলদঃ স্তুতিশাদ্বলেষু। তস্মাৎ স্নিকেশনখলোমতুষেষু দৃষ্টো দুঃখং দদাতি বহুশঃ খনুখঞ্জরী
টঃ॥ বমতুরাজে খঞ্জরীটেন নমস্কারমাহ॥ ওঁ যোগযুক্তো মুনিশ্রুতকন্মং মন্ত্রস্তদাস্মেমিশিল্পোপাসেন। ওঁ দৃশ্যস্সেব্যোব্রূমিনিগতীয়াং ওঁ খঞ্জনাস্থর্য্যমাযোনমস্তু॥ জ্যোতিষে॥ নীলগ্রীবস্তুগ্রীবসর্ব্বকা

লা

সপ্তম্যাং । পৃথীব্যামবতীর্ণোসি শ্রীমত্যবাসি নমোস্তুতে ॥ স্নানবিশেষে শ্রীমত্ত্বদর্শনে সুস্তাস্তুক ফঁলাদ্ বর্ষকালে ॥ বিস্তৃতব্রহ্মানিকার্য্যসিদ্ধিবত্না শক্রেকৃতাশোভযং যাম্যামগ্নিকৃত্যং সুবর্ত্তিদ্বিকানির্ণীতঃ সমুদ্রা শ্রী ১০
নয়ে । বায়ব্যাং বরবস্ত্রগন্ধমালিনং দিব্যাঙ্গনাত্তেত্রবেতৈশান্যাং সবনং ধ্রুবং নিগদিতং দিগ্লক্ষনং শ্রীএজনে ॥ ০ ॥ অথবসন্তকালীনদুর্গাপূজা ॥ তত্তুবিষ্ণুপুরাণং ॥ মীনরাশিস্থিতে সূর্য্যে শু
ক্লপক্ষেনরাধিপ । সপ্তমীং দশমীং যাবৎ পূজয়েদম্বিকাং সদা । তবিষ্ণোত্তরে । চৈত্রেমাসিসি তপক্ষে সপ্তম্যাদিদিনত্রয়ে । পূজয়েদ্বিধিবদ্দুর্গাং দশম্যাং বিসর্জয়েৎ । কালকৌমুদ্যাং জাবালিঃ
চৈত্রেমাসিসিতপক্ষে সপ্তম্যাদিদিনত্রয়ে । পূজয়েদ্বিবিধৈর্দ্রব্যৈর্বস্ত্রং কুসুমৈস্তথা । নানাবি ধৈশ্চবলিভির্মেধ্যাতৈর্দোষবর্জিতৈঃ । বিচিত্রাভরনৈঃ পাথপট্টবস্ত্রাদিভিস্তথা । এবং যঃ কুরুতে শ্র
দ্ধাং বর্ষে বর্ষে বিধানতঃ । তোষ্টিতাননদংতত্তে কামান পূত্রপৌত্রাদিকান্নৃপ ইত্যুক্তবিষ্ণোত্তরবচনে নিরুপপদমাসশব্দশ্রবণাত্তত্তুবিষ্ণুপুরাণীয়বচনে মীনরাশিস্থিতে ইতি মীনস্থরব্যবচ্ছ
চান্দ্রেমাসীয়াতিথিপরং । সৌরপরত্বে কদাচিৎ সপ্তম্যাদিতিথিত্রয়ানাতে তদ্বর্ষে কর্ম্মা লোপাপত্তেঃ । নচেষ্টাপত্তিঃ তবিষ্ণুপুরাণবচনে সদাপদোপাদানাৎ জাবালিবচনে বর্ষে
বর্ষে ইত্যুপাদানাচ্চাসম্ভবিতত্বং । এতদ্বিবৃতং কালবিবেকে । এবং জাবালিশেষবচনপর্যালোচনেপি পুত্রাদিরূপফলশ্রবনাৎ কাম্যত্বং । এতচ্চ কাম্যপূজনে কৃতে প্রসঙ্গান্নিত্যপূজাসিদ্ধিঃ শারদীয়পূজাবৎ ॥ চৈত্র

শুক্লপক্ষমধিকৃত্যদেবীপূজনং ॥ নবম্যাং পূজয়েদ্দেবীং মহিষাসুরমর্দ্দিনীং । কুঙ্কুমাগুরুকর্পূরধূপান্নধ্বজতর্পণৈঃ । উপহারৈর্ব্বহুবিধৈশ্চ বিজয়াখ্যং পদং নরো
যবক্ষ্যাত শারদীয়পূজাপ্রকরণোক্তা গ্রাহ্যা । বিশেষস্তু বোধনপ্রভৃতি যা নাস্তি বোধি তথা বোধনামন্ত্রবাং হ্রুং ত বিবৃতং প্রাগেব হোমাদিকন্তু পূর্ব্ববৎ
নপানিমহামহোপাধ্যায়বিরচিতদুর্গোৎসববিবেকঃ সমাপ্তঃ ॥ ০০০০০ ০০০॥

শ্রী ২২